मातृ-स्मृति



मातु श्री रानी माँ

श्री स्वामी रामहर्षणदास जी विरचित

पुस्तक प्राप्ति स्थान

श्री रामहर्षण सेवा संस्थान
परिक्रमा मार्ग नया घाट
अयोध्या(उ.प्र.) - मो. 7800126630

ॐ नमः सीतारामाभ्यां

विक्रमाब्दे पञ्च सप्त, नव एकाङ्कानां निर्मिते ।
फाल्गुने-शुक्ल-पक्षेच, यात्रार्थाय गतो पिता ।।१।।

अहो सार्धैक वर्षस्य, आयुश्चमे यदाऽभवत् ।
सुक्षेत्रे जगन्नाथस्य, पिता श्री रामजीवनः ।।२।।

दिवंगतो तदा त्यक्त्त्वा, रुदतींमाञ्च मातरम् ।
हा! अनाथा में जननी, पति शोक समाकुला ।।३।।

स्वपुत्रं लालयामास, मुखं दृष्ट्वा मुहुर्मुहुः ।
गृह भार परिक्लान्ता, सहायो चाप्य दर्शिता ।।४।।

अनिन्दिता महाभागा, सुष्ठु क्रियया पोषणात् ।
चकार वत्सस्य माता, पालयन्तीच वैधव्यम् ।।५।।

सर्व संस्कार सम्पन्नम्, आत्मविद्या सुसंस्कृतम् ।
कृत्वा पुत्रं सुखं लेभे, पूर्व दुःखं विसर्जितम् ।।६।।

साधु सेवा रता साध्वी, राम भक्ति परायणा ।
दैवी सम्पत्ति संयुक्ता, मम माता मनस्विनी ।।७।।

सीतां स्वपुत्रि भावेन, रामं तु स्वसुतापतिम् ।
श्रद्धया सा सदा प्रेम्णा, सेवयति सुश्रूषया ॥८॥

सीतोद्वाह समासक्ता, साधूनामन्त्र्य सादरम् ।
मार्गशीर्षोत्तमे मासे, शुभे शुक्ल-द्वितीयतः ॥९॥

सप्तमी तिथि पर्यन्तं, कुर्वन्ती महदुत्सवम् ।
सर्वतः भारत प्रान्ततः, प्रायस्सु दर्शनोत्सुकाः ॥१०॥

आगत्य सुखं संलेभे, मन्येमानव साफलम् ।
राम भक्तिंच संप्राप्य, किं शेषं तु तं नराणाम् ॥११॥

एवं भाव समारूढा, करणेन धनादिभिः।
कृत्वोत्सवंहि सा माता, अति वृद्धा तपस्विनी ।।१२।।

पुत्रेण प्रार्थिता भक्ता, स्मरन्ती च काल स्थितिम् ।
सुतमाज्ञापयामास, विरक्तोभव सर्वतः ।।१३।।

ततः सा स्वाश्रित जनान् स्वस्नेहेन पालयन्तीच् ।
पुनः भार परिक्रान्ता, धैर्यं न विससर्जहा ।।१४।।

यथा पूर्वं तथा साधून, सेवयति स्वभावतः।
उत्सवञ्च यथा पूर्वं, माता कृत्वा मुमोद सा ।।१५।।

प्रहर रात्रि शेषात् सा, अर्ध रात्रि पर्यन्ताम् ।
जपन्ती राम रामेति, कुर्वती सत् कालक्षेपम् ।।१६।।

प्रेम्णा पुरुष सूक्तेन, शालिग्राममर्चयति ।
नित्यं स्तुत्याच पाठेन, याचयति प्रेमोज्वलम् ।।१७।।

श्री हरि–गुरु–साधूनां, पादोदक मुच्छिष्टकम् ।
सेवयति महाभागा, सीतार्थं सा चेष्टयति। ।।१८।।

चरितं हरिभक्तानाम्, श्रृणोति श्रावयति च ।
स्वयमानन्दमास्वाद्य, आनन्दयति श्रोत्रीणाम् ।।१९।।

देह-गेह मनासक्ता, अक्रोधा अल्पभोजना ।
सदा शान्ता द्वेष शून्या, भक्तानाम्पथगामिनी ॥२०॥

येनकेन च संतुष्टा, राम भक्ति परायणा ।
नैच्यभावानुसंधाय, अहंहीना अऽऽतन्द्रिता ॥२१॥

मानदा सर्व भावेन, सर्वं सादरेण साध्वी ।
अहो स्वभावं अद्यापि, तस्या स्मरणात् सुष्ठुं ॥२२॥

प्रहृष्यन्ति जनाः सर्वे, प्राप्ताः ये मातृदर्शनम् ।
मामधिकं मन्यते, प्रेम्णाकथयन्ति सर्वे ॥२३॥

सीता विवाहे यदास्यात्, मातुश्च दर्शनं तदा ।
रक्षणीयः सदा तात, साधुभावस्त्वया कथ्यति ।।२४।।

रामभक्ति सुवृध्यर्थं, आशीषयत्यकामा ।
कदा कश्चित रूपेण, नाप्यसहाया सहायम् ।।२५।।

पुत्राच्चापि सहायत्वं, नित्यं सीताऽभिरक्षिता ।
धन्य धन्यतमा माता, स्वगुणेन संपूजिता ।।२६।।

कृपा दर्शनं सीतायाः, प्राप्य प्रायो प्रहर्षिता ।
प्रवृद्धि प्रीतिर्हृदाकाशे, सा रामं समर्चयति ।।२७।।

प्रेक्ष्याऽपि सुचमत्कारान्, न स्मयगता स्वसिद्धा ।
सर्वं श्री कार्यं मन्स्यन्ते, भवति यो यो त्रिकालम् ।।२८।।

साधवः साधुवादश्च, सदा तस्यै समर्प्यते ।
जनन्याः भागवत् धर्मान्, श्रावयन्ति श्रृण्वन्ति च ।।२९।।

हर्षेण महता युक्ता, साधु सेवा रता सदा ।
पुत्र - कीर्तिं शुभा श्रुत्वा, आनन्दाश्रु जलं-प्लुता ।।३०।।

कालक्षेपं करोत्येवं, सर्वदा शुभ दर्शिनी ।
प्रवर्धते यथा आयुस्तथा, तस्या बुद्धि-सूक्ष्मा ।।३१।।

अन्तकालेऽपि सा मेधा, वर्तमानानुयायिनी ।
न सज्जते जगज्जाले, राम चरणे चार्पिता ॥३२॥

नवतिम्वर्षगता च, तस्यैव मायुर्शोभना ।
एक-त्रय-शून्य द्वयो, रङ्कानाम्विक्रमाब्दे च ॥३३॥

हा चैत्र-शुक्ल प्रतिपद् तिथौच प्रयाग क्षेत्रे ।
दिने प्रहरावशेषे, वदन्ती राम रामेति ॥३४॥

सीता सकासं साकेतं, गतवती त्वरान्विता ।
धन्य धन्या मे जननी, राम भक्ति परायणा ॥३५॥

एता दृश जनन्यै अहमर्पये कोटि प्रणामम् ।
सादर सुष्टु भावेन, प्रसन्ना भव वत्सले ॥३६॥

क्षमस्व चापराधं में, कृत: किञ्चित्सेवा न ते ।
कृतघ्नो क्रिया अन्त्येष्टिम्, किं, दर्शनन्नपि कृत: ॥३७॥

चुल्लुकेन जलेन वा, श्राद्धेन तर्पये न त्वाम् ।
धिगधिक् कुपुत्रं मां माता, कलिकलुषेन मोहितम् ॥३८॥

वृद्धां तपस्विनीं त्यक्त्वा, मातरं पुत्रवत्सलाम् ।
इदं गृह त्यागो हि मे, अभवत्तवापराध: ॥३९॥

यत्र स्थिताऽसि हे मातः, तत्रतः मयि कृपां कुरु ।
पूर्ण वात्सल्य भावेन, राम-प्रेम प्रदा भव ।।४०।।

सह पुत्र्या मातरम् ते, नेत्राभ्यां पश्येमहम् ।
सद्भावेन द्वयोस्सेवा, प्राप्तेर्योग्यता संभवेत् ।।४१।।

सदां मधुरया वाचा, राम रामेति च स्मरन् ।
प्रदेहि वरं वरदे काल क्षेप करोम्यहम् ।।४२।।

स्वभावं राम भक्तानां, शरणागत चेतसाम् ।
रामहर्षण दासाय, देहि त्वं पुत्र वत्सले ।।४३।।

न लज्जयामि ते कुक्षिं, मातर्यथा तथा कुरु ।
रानी नाम्ना प्रसिद्धि स्ते, पुत्रं पालय याचकम् ।।४४।।

न कृतज्ञता ज्ञाप्तये, शब्दो मातर्मे सकासे ।
अहमस्त्वाञ्जलिं बद्ध्वा, प्रणमामि पुनः पुनः ।।४५।।

इदं भावं पुरस्कृत्य, मन्दिरे य जनन्याग्रे ।
भक्त्या पठिष्यन्ति नित्यं, तेषां सर्व कामान् कामा ।।४६।।

करिष्यन्ति फलवन्तं, किञ्चित नाऽत्र संशयम् ।
उदार हृदया साध्वी, न चान्यथा ब्रवीम्यहम् ।।४७।।

ooooo

श्री रामहर्षण सेवा संस्थान, नयाघाट, परिक्रमा मार्ग, अयोध्या उ.प्र.

प्रकाशन विभाग

दूरभाष : २३२३१७

न्यौछावर रु. ५/-